Shri Raghunatha Temple MSS. Library,
JAMMU

No. १०५६ - घ

Title पवमान सूक्तानि

Author

Extent १५ Age

Subject ऋग्वेदः । सम्पूर्णम्

नं० १०५६-च

**पवमानसूक्तम्** (वेद: ऋग्वेदस्य नवममंडलस्य
पत्राणि १५ (सम्पूर्णम्) १-४ अध्यायेषु सूक्तानि)

नं० १०५६-च

वेद - ऋग्वेद

॥प॰ सू॰॥ श्रीगणेशाय नमः॥ श्रीसरस्वत्यै नमः॥ हरिः ॐ॥ स्वादिष्ठया मदिष्ठया पवस्व
॥१॥ सोम धारया॥ इंद्राय पातवे सुतः॥ रक्षोहा विश्वचर्षणिरभि योनिमयोहतं॥ द्रुणा स
धस्थमासदत्॥ वरिवोधातमो भव मंहिष्ठो वृत्रहंतमः॥ पर्षि राधो मघोनां॥ अभ्य
र्ष महानां देवानां वीतिमंधसा॥ अभि वाजमुत श्रवः॥ त्वामच्छा चरामसि तदिदर्थं
दिवेदिवे॥ इंदो त्वे न आशसः॥१॥ पुनाति ते परिस्रुतं सोमं सूर्यस्य दुहिता॥ वारेण श
श्वता तना॥ तमीमण्वीः समर्यऽआ गृभ्णंति योषणो दश॥ स्वसारः पार्ये दिवि॥ तमी
हिन्वंत्यग्रुवो धमंति बाकुरं दृतिं॥ त्रिधातु वारणं मधु॥ अभीऽममघ्न्या उत श्रीणं
ति धेनवः शिशुं॥ सोममिंद्राय पातवे॥ अस्येदिंद्रो मदेष्वा विश्वा वृत्राणि जिघ्नते॥
शूरो मघा च मंहते॥२॥ पवस्व देववीरति पवित्रं सोम रंह्या॥ इंद्रमिंदो वृषा विश॥ आ
वच्यस्व महि प्सरो वृषेंदो द्युम्नवत्तमः॥ आ योनिं धर्णसिः सदः॥ अधुक्षत प्रियं मधु
धारा सुतस्य वेधसः॥ अपो वसिष्ट सुक्रतुः॥ महांतं त्वा महीरन्वापोऽअर्षंति सिंधवः॥
यद्गोभिर्वासयिष्यसे॥ समुद्रो अप्सु मामृजे विष्टंभो धरुणो दिवः॥ सोमः पवित्रेऽअ
स्मयुः॥३॥ अचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः॥ सं सूर्येण रोचते॥ गिरस्त इंद्र
ओजसा मर्मृज्यंतेऽअपस्युवः॥ याभिर्मदाय शुंभसे॥ तं त्वा मदाय घृष्वयऽउ लोककृ
त्नुमीमहे॥ तव प्रशस्तयो महीः॥ अस्मभ्यमिंदविंद्रयुर्मध्वः पवस्व धारया॥ पर्जन्यो
वृष्टिमाँ इव॥ गोषा इंदो नृषाऽअस्यश्वसा वाजसाऽउत॥ आत्मा यज्ञस्य पूर्व्यः॥४॥ ॥१॥
एष देवो अमर्त्यः पर्णवीरिव दीयति॥ अभि द्रोणान्यासदं॥ एष देवो विपा कृतोऽति ह्वरां

एषदिवंविधावतितिरोरजांसिधारया। पवमानःकनिक्रदत्॥४
सिधावति॥ पवमानोऽअदाभ्यः॥ एषदेवोविपन्युभिः पवमानऽऋतायुभिः॥ हरिर्वाजायमृ
ज्यते॥ एषविश्वानिवार्याशूरोयन्निवसत्वभिः॥ पवमानःसिषासति॥ एषदेवोरथर्यतिप
वमानोदशस्यति॥ आविष्कृणोतिवग्वनुं॥५॥ एषविप्रैरभिष्टुतोपोदेवोविगाहते॥ दधद्र
त्नानिदाशुषे॥ एषदिवंव्यासरत्तिरोरजांस्यस्पृतः॥ पवमानःस्वध्वरः॥ एषप्रत्नेनज
न्मनादेवोदेवेभ्यःसुतः॥ हरिःपवित्रेऽअर्षति॥ एषउस्यपुरुव्रतोजज्ञानोजनयन्निषः।
धारयापवतेसुतः॥६॥ सनोचसोमजेषिचपवमानमहिश्रवः॥ अथानोवस्यसस्कृधि।
सनाज्योतिःसनास्व१र्विश्वाचसोमसौभगा॥ अ०॥ सनादक्षमुतक्रतुमपसोममृधोजा।
हि॥ अ०॥ पवीतारःपुनीतनसोममिन्द्रायपातवे॥ अ०॥ त्वंसूर्येनऽआभजतवक्रत्वातवोति
भिः॥ अ०॥७॥ तवक्रत्वातवोतिभिर्ज्योक्पश्येमसूर्यं॥ अ०॥ अभ्यर्षस्वायुधसोमद्विबर्ह
संरयिं॥ अ०॥ अभ्य१र्षानपच्युतोरयिंसमत्सुसासहिः॥ अ०॥ त्वांयज्ञैरवीवृधन्पवमा।
नविधर्मणि॥ अ०॥ रयिन्नश्चित्रमश्विनमिंदोविश्वायुमाभर॥ अ०॥८॥ समिद्धोविश्व
तस्पतिःपवमानोविराजति॥ प्रीणन्वृषाकनिक्रदत्॥ तनूनपात्पवमानःशृंगेशिशानो
ऽअर्षति॥ अंतरिक्षेणरारजत्॥ ईळेन्यःपवमानोरयिर्विराजतिद्युमान्॥ मधोर्धारा।
भिरोजसा॥ बर्हिःप्राचीनमोजसापवमानस्तृणन्हरिः॥ देवेषुदेवईयते॥ उदातैर्जिहते
बृहद्वारोदेवीर्हिरण्ययीः॥ पवमानेनसुष्टुताः॥९॥ सुशिल्पेबृहतीमहीपवमानोवृष
ण्यति॥ नक्तोषासानदर्शते॥ उभादेवानृचक्षसाहोतारादैव्याहुवे॥ पवमानइंद्रोवृषा॥
भारतीपवमानस्यसरस्वतीळामही॥ इमंनोयज्ञमागमंतिस्रोदेवीःसुपेशसः॥ त्वष्टार

॥प॰स॰॥ मग्रजांगोपांपुरोयावानमाहुवे ॥ इंदुरिंद्रोवृषाहरिःपवमानःप्रजापतिः ॥ वनस्पतिं
॥२॥ पवमानमध्वासमंङ्ग्धिधारया ॥ सहस्रवल्शंहरितंभ्राजमानंहिरण्ययं ॥ विश्वेदेवाः
2 स्वाहाकृतिंपवमानस्यागत ॥ वायुर्बृहस्पतिःसूर्योग्निरिंद्रःसजोषसः ॥ १० ॥ मंद्रया
सोमधारयावृषापवस्वदेवयुः ॥ अव्योवारेष्वस्मयुः ॥ अभित्यंमद्यंमदमिंदविंद्रइति
क्षर ॥ अभिवाजिनोऽअर्वतः ॥ अभित्यंपूर्व्यंमदंसुवानोऽअर्षपवित्रऽआ ॥ अभिवाज
मुतश्रवः ॥ अनुद्रप्सासऽइंदवऽआपोनप्रवतासरन् ॥ पुनानाऽइंद्रमाशत ॥ यमत्यमि
ववाजिनंमृजंतियोषणोदश ॥ वनेक्रीडंतमत्यविं ॥ ११ ॥ तंगोभिर्वृषणंरसंमदाय
देववीतये ॥ सुतंभरायसंसृज ॥ देवोदेवायधारयेंद्रायपवतेसुतः ॥ पयोयदस्यपीप
यत् ॥ आत्मायज्ञस्यरंह्योसुष्वाणःपवतेसुतः ॥ प्रत्नंनिपातिकाव्यं ॥ एवापुनानइंद्र
युर्मदंमदिष्ठवीतये ॥ गुहाचिद्दधिषेगिरः ॥ १२ ॥ असृग्रमिंदवःपथाधर्मन्नृतस्यसु
श्रियः ॥ विदानाऽअस्ययोजनं ॥ प्रधारामध्वोऽअग्रियोमहीरपोविगाहते ॥ हविर्हविः
षुवंद्यः ॥ प्रयुजोवाचोऽअग्रियोवृषावचक्रदद्वने ॥ सद्माभिसत्योऽअध्वरः ॥ परियत्
काव्याकविर्नृम्णावसानोऽअर्षति ॥ स्वर्वाजीसिषासति ॥ पवमानोऽअभिस्पृधोवि
शोराजेवसीदति ॥ यदीमृण्वंतिवेधसः ॥ १३ ॥ अव्योवारेपरिप्रियोहरिर्वनेषुसीदति ॥
रेभोवनुष्यतेमती ॥ सवायुमिंद्रमश्विनासाकंमदेनगच्छति ॥ रणायोऽअस्यधर्मभिः ॥
आमित्रावरुणाभगंमध्वःपवंतऊर्मयः ॥ विदानाऽ अस्यशक्मभिः ॥ अस्मभ्यंरो ॥२॥
दसीरयिंमध्वोवाजस्यसातये ॥ श्रवोवसूनिसंजितं ॥ १४ ॥ एतेसोमाऽअभिप्रियमिंद्र

पुनानासश्चमूषदोगच्छंतोवायुमश्विना॥तेनोधांतुसुवीर्यं॥१

स्यकाममक्षरन्॥वर्द्धंतोऽअ[स्य]वीर्यं॥इंद्रस्यसोमराधसेपुनानोहार्दिचोदय॥ऋत
स्ययोनिमासदं॥मृजंतित्वादशक्षिपोहिन्वंतिसप्तधीतयः॥अनुविप्राऽअमादिषुः॥
देवेभ्यस्त्वामदायकंसृजानमतिमेष्यः॥संगोभिर्वासयामसि॥१५॥पुनानःकलशे
ष्वावस्त्राण्यरुषोहरिः॥परिगव्यान्यव्यत॥मघोनऽआपवस्वनोजहिविश्वाअप
द्विषः॥इंदोसखायमाविश॥वृष्टिंदिवःपरिस्रवद्युम्नंपृथिव्याऽअधि॥सहोनः
सोमपृत्सुधाः॥नृचक्षसंत्वावयमिंद्रपीतंस्वर्विदं भक्षीमहिप्रजामिषं॥१६॥परि
प्रियादिवःकविर्वयांसिनप्त्योर्हितः॥सुवानोयातिकविक्रतुः॥प्रप्रक्षयायपन्यसे
जनायजुष्टोऽअद्रुहे॥वीत्यर्षचनिष्ठया॥ससूनुर्मातराशुचिर्जातोजातेऽअरोचय
त्॥महान्महीऽऋतावृधा॥ससप्तधीतिभिर्हितोनद्योऽअजिन्वदद्रुहः॥याऽएक
मक्षिवावृधुः॥ताऽअभिसंतमस्तृतंमहेयुवानमादधुः॥इंदुमिंद्रतवव्रते॥१७॥
अभिवह्निरमर्त्यःसप्तपश्यतिवावहिः॥क्रिविर्देवीरतर्पयत्॥अवाकल्पेषुनः
पुमस्तमांसिसोमयोध्या॥तानिपुनानजंघनः॥नूनव्यसेनवीयसेसूक्तायसा
धयापथः॥प्रत्नवद्रोचयारुचः॥पवमानमहिश्रवोगामश्वंरासिवीरवत्॥सनामे
धांसनास्वः॥१८॥प्रस्वानासोरथाइवार्वंतोनश्रवस्यवः॥सोमासोरायेऽअक्रमुः॥
हिन्वानासोरथाइवदधन्विरेगभस्त्योः॥भरासःकारिणामिव॥राजानोनप्रश
स्तिभिःसोमासोगोभिरंजते॥यज्ञोनसप्तधातृभिः॥परिसुवानासऽइंदवोमदा
यबर्हणागिरा॥सुताऽअर्षंतिधारया॥अपानासोविवस्वतोजनंतऽउषसोभगं॥

॥प.सू.॥ सूरा ऽ अ एवंविततन्वते ॥१९॥ अपघ्नरोमतीनां प्रलो अरू एवंतिकारवः ॥ य ष्वोहदूस ऽ आ
॥३॥ यवः ॥ समीचीनासः ऽ आसते होतारः सप्तजामयः ॥ पदमेकस्यपिप्रतः ॥ नाभानाभिन्न
3 ऽ आददे चक्षुश्चित्सूर्ये सचा ॥ कवेरपत्यमादुहे ॥ अभिप्रियादिवस्पदमध्वर्युभिर्गुहा ।
हितं ॥ सूरः पश्यति चक्षसा ॥२०॥ उपास्मैगायतानरः पवमानायेन्दवे ॥ अभिदेवाँ इय
क्षते ॥ अभितेमधुनापयो ऽ थर्वाणो ऽ अशिश्रयुः ॥ देवंदेवायदेवयु ॥ सनः पवस्वशंग
वे शंजनाय शमर्वते ॥ शंराजन्नोषधीभ्यः ॥ बभ्रवेनुस्वतवसेरुणायदिविस्पृशे ॥ सोमा
यगाथमर्चत ॥ हस्तच्युतेभिरद्रिभिः सुतंसोमंपुनीतन ॥ मधावाधावतामधु ॥२१॥ न
मसेदुपसीदत दध्नेदभिश्रीणीतन ॥ इंदुमिंद्रेदधातन ॥ अमित्रहाविचर्षणिः पवस्व
सोमशंगवे ॥ देवेभ्यो ऽ अनुकामकृत् ॥ इंद्रायसोमपातवेमदायपरिषिच्यसे ॥ मनश्चि
न्मनसस्पतिः ॥ पवमानसुवीर्यंरयिंसोमरिरीहिनः ॥ इंदुमिंद्रेणनोयुजा ॥२२॥ सोमाः
असृग्रमिंदवः सुताऽ ऋतस्यसादने ॥ इंद्रायमधुमत्तमाः ॥ अभिविप्राऽ अनूषतगा
वो वत्संनमातरः ॥ इंद्रंसोमस्यपीतये ॥ मदच्युत्क्षेतिसादनेसिंधोरूर्मा विपश्चित ॥ सो
मो गौरीऽ अधिश्रितः ॥ दिवोनाभाविचक्षणो व्योवारेमहीयते ॥ सोमोयः सुक्रतुः कविः ॥
यः सोमः कलशेष्वाँऽ अंतः पवित्रऽ आहितः ॥ तमिंदुः परिषस्वजे ॥२३॥ प्रवाचमिंदु ।
रिष्यति समुद्रस्याधिविष्टपि ॥ जिन्वन्कोशंमधुश्चुतं ॥ नित्यः स्तोत्रोवनस्पतिर्धीना
मंतः सबर्दुघः ॥ हिन्वानोमानुषायुगा ॥ अभिप्रियादिवस्पदासोमोहिन्वानोऽर्षति ॥ ॥३॥
विप्रस्यधारयाकविः ॥ आपवमानधारयरयिंसहस्रवर्चसं ॥ अस्मेऽ इंदोस्वाभुवं ॥२४॥
॥ इतिपवमानसूक्तप्रथमोध्यायः ॥१॥

हरिःऽओम्॥सोमःपुनानोऽअर्षतिसहस्रधारोऽअत्यविः॥वायोरिंद्रस्यनिष्कृतं॥पवमा
नमवस्यवोविप्रमभिप्रगायत॥सुष्वाणंदेववीतये॥पवंतेवाजसातयेसोमाःसहस्रपा
जसः॥गृणानादेववीतये॥उतानोवाजसातयेपवस्वबृहतीरिषः॥द्युमदिंदोसुवीर्यं॥ते
नःसहस्रिणंरयिंपवंतामासुवीर्यं॥सुवानादेवासऽइंदवः॥१॥अत्याहियानानहेतृभि
रसृग्रंवाजसातये॥विवारमव्यमाशवः॥वाश्राऽअर्षंतींदवोऽभिवत्संनधेनवः॥दधन्वि
रेगभस्त्योः॥जुष्टऽइंद्रायमत्सरःपवमानःकनिक्रदत्॥विश्वाऽअपद्विषोजहि॥अपघ्नं
तोऽअराव्णःपवमानाःस्वर्दृशः॥योनावृतस्यसीदत॥२॥परिप्रासिष्यदत्कविःसिंधोरू
र्मावधिश्रितः॥कारंबिभ्रत्पुरुस्पृहं॥गिरायदीसबंधवःपंचव्राताऽअपस्यवः॥परिष्कृ
ण्वंतिधर्णसिं॥आदस्यशुष्मिणोरसेविश्वेदेवाऽअमत्सत॥यदीगोभिर्वसायते॥निरिणा
नोविधावतिजहच्छर्याणितान्वा॥अत्रासंजिघ्नतेयुजा॥नप्तीभिर्योविवस्वतःशुभ्रोनमा
मृजेयुवा॥गाःकृण्वानोननिर्णिजं॥३॥अतिश्रितीतिरश्चतागव्याजिगात्यण्व्या॥वग्नु
मियर्तियंविदे॥अभिक्षिपःसमग्मतमर्जयंतीरिषस्पतिं॥पृष्ठागृभ्णतवाजिनः॥परि
दिव्यानिमर्मृशद्विश्वानिसोमपार्थिवा॥वसूनियाह्यस्मयुः॥४॥एषधियायात्यण्व्याशू
रोरथेभिराशुभिः॥गच्छन्निंद्रस्यनिष्कृतं॥एषपुरुधियायतेबृहतेदेवतातये॥यत्रामृता
सऽआसते॥एषहितोविनीयतेऽंतःशुभ्रावतापथा॥यदीतुंजंतिभूर्णयः॥एषशृंगाणिदो
धुवच्छिशीतेयूथ्योवृषा॥नृम्णादधानऽओजसा॥एषरुक्मिभिरीयतेवाजीशुभ्रेभि
रंशुभिः॥पतिःसिंधूनांभवन्॥एषवसूनिपिब्दनापरुषाययिवाँऽअति॥अवशादेषुगच्छ

॥प॰सू॰॥ ति॥ एतंमृजंतिमर्ज्यमुपद्रोणेष्वायवः॥ प्रचक्राणंमहीरिषः॥ एतमुत्यंदशक्षिपोमृजंति
॥४॥ सप्तधीतयः॥ स्वायुधंमदिंतमं॥ ५॥ प्रतेसोतारओण्यो३रसंमदायघृष्वये॥ सर्गोनत
क्त्येतशः॥ क्रत्वादक्षस्यरथ्यमपोवसानमंधसा॥ गोषामण्वेषुसश्चिम॥ अनप्तमप्सु
दुष्टरंसोमंपवित्रऽआसृज॥ पुनीहींद्रायपातवे॥ प्रपुनानस्यचेतसासोमःपवित्रेऽअ
र्षति॥ क्रत्वासधस्थमासदत्॥ प्रत्वानमोभिरिंदवऽइंद्रसोमाऽअसृक्षत॥ महेभराय
कारिणः॥ पुनानोरूपेऽअव्ययेविश्वाऽअर्षन्नभिश्रियः॥ शूरोनगोषुतिष्ठति॥ दिवो
नसानुपिप्युषीधारासुतस्यवेधसः॥ वृथापवित्रेऽअर्षति॥ त्वंसोमविपश्चितंतना
पुनानऽआयुषु॥ अव्योवारंविधावसि॥ ६॥ प्रनिम्नेनेवसिंधवोघ्नंतोवृत्राणिभूर्णयः॥
सोमाऽअसृग्रमाशवः॥ अभिसुवानासऽइंदवोवृष्टयःपृथिवीमिव॥ इंद्रंसोमासोऽअ
क्षरन्॥ अत्यूर्मिर्मत्सरोमदःसोमःपवित्रेऽअर्षति॥ विघ्नन्रक्षांसिदेवयुः॥ आकलशेषु
धावतिपवित्रेपरिषिच्यते॥ उक्थैर्यज्ञेषुवर्द्धते॥ अतित्रीसोमरोचनारोहन्नभ्राजसे
दिवं॥ इष्णन्त्सूर्यंनचोदयः॥ अभिविप्राऽअनूषतमूर्धन्यज्ञस्यकारवः॥ दधानाश्च
क्षसिप्रियं॥ तमुत्वावाजिनंनरोधीभिर्विप्राऽअवस्यवः॥ मृजंतिदेववीतये॥ मधोर्धा
रामनुक्षरतीव्रःसधस्थमासदः॥ चारुरृतायपीतये॥ ७॥ परिसुवानोगिरिष्ठाःप
वित्रेसोमोऽअक्षाः॥ मदेषुसर्वधाऽअसि॥ त्वंविप्रस्त्वंकविर्मधुप्रजातमंधसः॥ म
दे॰॥ तवविश्वेसजोषसोदेवासःपीतिमाशत॥ मदे॰॥ आयोविश्वानिवार्यावसूनिह ॥४॥
स्तयोर्दधे॥ मदे॰॥ यऽइमेरोदसीमहीसंमातरेवदोहते॥ मदे॰॥ परियोरोदसीऽउभेस

घो वाजेभिरर्षति ॥ मदे० ॥ स शुष्मी कलशेष्वा पुनानो ऽअचिक्रदत् ॥ मदे० ॥ ८ ॥ यत्सो
मचित्रमुक्थ्यं दिव्यं पार्थिवं वसु ॥ तन्नः पुनान ऽआभर ॥ युवं हि स्थः स्वर्पती ऽइंद्रश्च सो
म गोपती ॥ ईशाना पिप्यतं धियः ॥ वृषा पुनान ऽआयुषु स्तनयन्नधि बर्हिषि ॥ हरिः स
न्योनिमासदत् ॥ अवावशंत धीतयो वृषभस्याधि रेतसि ॥ सूनोर्वत्सस्य मातरः ॥ कुवि
द्वृषण्यंतीभ्यः पुनानो गर्भमादधत् ॥ याः शुक्रं दुहते पयः ॥ उप शिक्षापतस्थुषो भियस
समाधेहि शत्रुषु ॥ पवमान विदा रयिं ॥ निशत्रोः सोम वृष्ण्यं निशुष्मं नि वयस्तिर ॥ दूरे वा
सतो ऽअंतिवा ॥ ९ ॥ प्र कविर्देववीतये ऽव्यो वारेभिरर्षति ॥ साह्वान्विश्वा ऽअभिस्पृधः ॥ स
हि ष्मा जरितृभ्य ऽआ वाजं गोमंतमिन्वति ॥ पवमानः सहस्रिणं ॥ परि विश्वानि चेतसा
मृशसे पवसे मती ॥ स नः सोम श्रवो विदः ॥ अभ्यर्ष बृहद्यशो मघवद्भ्यो ध्रुवं रयिं ॥ इषं
स्तोतृभ्य ऽआभर ॥ त्वं राजेव सुव्रतो गिरः सोमा विवेशिथ ॥ पुनानो वह्ने ऽअद्भुत ॥ स व
ह्निरप्सु दुष्टरो मृज्यमानो गभस्त्योः ॥ सोमश्चमूषु सीदति ॥ क्रीळुर्मखो न मंहयुः ॥ पवि
त्रं सोम गच्छसि ॥ दधत्स्तोत्रे सुवीर्यं ॥ १० ॥ एते धावंतीन्दवः सोमा ऽइंद्राय घृष्वयः ॥ म
त्सरासः स्वर्विदः ॥ प्रवृण्वंतो ऽअभियुजः सुष्वये वरिवोविदः ॥ स्वयं स्तोत्रे वयस्कृतः ॥
वृथा क्रीळंत ऽइंदवः सधस्थमभ्येकमित् ॥ सिंधोरूर्मा व्यक्षरन् ॥ एते विश्वानि वार्या
पवमानास आशत ॥ हिताननसप्तयो रथे ॥ आसिंपिशंगमिंदवो दधाता वेनमादिशे ॥
यो ऽअस्मभ्यमरावा ॥ ऋभुर्न रथ्यं नवं दधाता केतमादिशे ॥ शुक्राः पवध्वमर्णसा ॥ ए
त ऽउ त्ये ऽअवीवशन्काष्ठां वाजिनो ऽअक्रत ॥ सतः प्रासाविषुर्मतिं ॥ ११ ॥ एते सोमास ऽ

॥प॰सू॰॥ आव्यायोरथा ऽइव प्र वाजिनः ॥ सर्गाः सृष्टा ऽअहेषत ॥ एते वाता ऽइवोरवः पर्जन्यस्येव
॥५॥ वृष्टयः ॥ अग्नेरिव भ्रमा वृथा ॥ एते पूता विपश्चितः सोमासो दध्याशिरः ॥ विपा व्या।
5 नशुर्धियः ॥ एते मृष्टा ऽअमर्त्याः ससृवांसो न शश्रमुः ॥ इयक्षंतः पथो रजः ॥ एते पृष्ठा
नि रोदसोर्विप्रयंतो व्यानशुः ॥ उतेदमुत्तमं रजः ॥ तंतुं तन्वानमुत्तममनु प्रवत ऽआश
त ॥ उतेदमुत्तमाय्यं ॥ त्वं सोम पणिभ्य ऽआ वसु गव्यानि धारयः ॥ ततं तंतुमचिक्रदः ॥
१२ ॥ सोमा ऽअसृग्रमाशवो मधोर्मदस्य धारया ॥ अभि विश्वानि काव्या ॥ अनु प्रत्ना
स ऽआयवः पदं नवीयो ऽअक्रमुः ॥ रुचे जनंत सूर्यं ॥ आ पवमान नो भरार्यो ऽअदाशु
षो गयं ॥ कृधि प्रजावतीरिषः ॥ अभि सोमास ऽआयवः पवंते मद्यं मदं ॥ अभि कोशं म
धुश्चुतं ॥ सोमो ऽअर्षति धर्णसिर्दधान ऽइंद्रियं रसं ॥ सुवीरो ऽअभिशस्तिपाः ॥ इंद्रा
य सोम पवसे देवेभ्यः सधमाद्यः ॥ इंदो वाजं सिषाससि ॥ अस्य पीत्वा मदानामिंद्रो।
वृत्राण्यप्रति ॥ जघान जघनच्च नु ॥ १३ ॥ प्र सोमासो ऽअधन्विषुः पवमानास इंदवः ॥
श्रीणाना ऽअप्सु मृंजत ॥ अभि गावो ऽअधन्विषुरापो न प्रवता यतीः ॥ पुनाना ऽइंद्र।
माशत ॥ प्र पवमान धन्वसि सोमेंद्राय पातवे ॥ नृभिर्यतो वि नीयसे ॥ त्वं सोम नृमाद
नः पवस्व चर्षणीसहे ॥ सस्निर्यो ऽअनुमाद्यः ॥ इंदो यदद्रिभिः सुतः पवित्रं परिधा
वसि ॥ अरमिंद्रस्य धाम्ने ॥ पवस्व वृत्रहंतमोक्थेभिरनुमाद्यः ॥ शुचिः पावको ऽअद्भु
तः ॥ शुचिः पावक ऽउच्यते सोमः सुतस्य मध्वः ॥ देवावीरघशंसहा ॥ १४ ॥ पवस्व द ॥५॥
क्षसाधनो देवेभ्यः पीतये हरे ॥ मरुद्भ्यो वायवे मदः ॥ पवमान धिया हितो ऽभि यो

निंकनिक्रदत्॥यमेत्वायासुमाविशा॥संदेवैः शोभतेवृषाकविर्योनावधिप्रियः॥वृ
त्रहादेववीतमः॥विश्वारूपाण्याविशन्पुनानोयातिहर्यतः॥यत्रामृतासऽआसते॥
अरूरुचज्जनयन्गिरः सोमःपवतऽआयुषक्॥इंद्रंगच्छन्कविक्रतुः॥आपवस्वमदिंत
मपवित्रंधारयाकवे॥अर्कस्ययोनिमासदं॥१५॥तममृक्षंतवाजिनमुपस्थेऽअ
दितेरधि॥विप्रासोऽअण्व्याधिया॥तंगावोऽअभ्यनूषतसहस्रधारमक्षितं॥इंद्रं
धर्त्तारमादिवः॥तंवेधांमेधयाह्यन्पवमानमधिद्यवि॥धर्णसिंभूरिधायसं॥तमह्यं
न्भुरिजोर्धियासंवसानंविवस्वतः॥पतिंवाचोऽअदाभ्यं॥तंसानावधिजामयोहरिंहि
न्वंत्यद्रिभिः॥हर्यतंभूरिचक्षसं॥तंत्वाहिन्वंतिवेधसःपवमानगिरावृधं॥इंदविंद्राय
मत्सरं॥१६॥एषकविरभिष्टुतःपवित्रेऽअधितोशते॥पुनानोघ्नन्नपस्रिधः॥एषइं
द्रायवायवेस्वर्जित्परिषिच्यते॥पवित्रेदक्षसाधनः॥एषनृभिर्विनीयतेदिवोमूर्द्धा
वृषासुतः॥सोमोवनेषुविश्ववित्॥एषगव्युरचिक्रदत्पवमानोहिरण्ययुः॥इंदुःस
त्राजिदस्तृतः॥एषसूर्येणहासतेपवमानोऽअधिद्यवि॥पवित्रेमत्सरोमदः॥एषशु
ष्म्यसिष्यददंतरिक्षेवृषाहरिः॥पुनानऽइंदुरिंद्रमा॥१७॥एषवाजीहितोनृभिर्वि
श्वविन्मनसस्पतिः॥अव्योवारंविधावति॥एषपवित्रेअक्षरत्सोमोदेवेभ्यःसुतः॥
विश्वाधामान्याविशन्॥एषदेवःशुभायतेधियोनावमर्त्यः॥वृत्रहादेववीतमः॥ए
षवृषाकनिक्रदद्दशभिर्जामिभिर्यतः॥अभिद्रोणानिधावति॥एषसूर्यमरोचयत्पव
मानोविचर्षणिः॥विश्वाधामानिविश्ववित्॥एषशुष्म्यदाभ्यःसोमःपुनानोऽअ

॥प॰सू॰॥ षति॥देवावीरघशंसहा॥१८॥प्रास्यधाराऽअक्षरन्वृष्णःसुतस्योजसा॥देवाँऽअनुप्र
॥६॥ भूषतः॥सप्तिंमृजंतिवेधसोगृणंतःकारवोगिरा॥ज्योतिर्जज्ञानमुक्थ्यं॥सुषहासो
6 मनानितेपुनानायप्रभूवसो॥वर्द्धासमुद्रमुक्थ्यं॥विश्वावसूनिसंजयन्पवस्वसोम
धारया॥इनुद्वेषांसिसध्र्यक्॥रक्षासुनोऽअररुषःस्वनात्समस्यकस्यचित्॥निदो
यत्रमुमुच्महे॥एंदोपार्थिवंरयिंदिव्यंपवस्वधारया॥द्युमंतंशुष्ममाभर॥१९॥प्र
धाराअस्यशुष्मिणोवृथापवित्रेअक्षरन्॥पुनानोवाचमिष्यति॥इंदुर्हियानःसो
तृभिर्मृज्यमानःकनिक्रदत्॥इयर्तिवग्नुमिंद्रियं॥आनःशुष्मंनृषाह्यंवीरवंतंपु
रुस्पृहं॥पवस्वसोमधारया॥प्रसोमोऽअतिधारयापवमानोऽअसिष्यदत्॥अभि
द्रोणान्यासदं॥अप्सुत्वामधुमत्तमंहरिंहिन्वंत्यद्रिभिः॥इंदुमिंद्रायपीतये॥सुनो
तामधुमत्तमंसोममिंद्रायवज्रिणे॥चारुंशर्धायमत्सरं॥२०॥प्रसोमासःस्वाध्या
ःपवमानासोऽअक्रमुः॥रयिंकृण्वंतिचेतनं॥दिवस्पृथिव्याऽअधिभवेंदोद्यु
म्नवर्द्धनः॥भवावाजानांपतिः॥तुभ्यंवाताऽअभिप्रियस्तुभ्यमर्षंतिसिंधवः॥सो
मवर्द्धंतितेमहः॥आप्यायस्वसमेतुतेविश्वतःसोमवृष्ण्यं॥भवावाजस्यसंगथे॥
तुभ्यंगावोघृतंपयोबभ्रोदुदुह्रेऽअक्षितं॥वर्षिष्ठेअधिसानवि॥स्वायुधस्यतेसतो
भुवनस्यपतेवयं॥इंदोसखित्वमुश्मसि॥२१॥प्रसोमासोमदच्युतःश्रवसेनोमघो
नः॥सुताविदथेऽअक्रमुः॥आदिंत्रितस्ययोषणोहरिंहिन्वंत्यद्रिभिः॥इंदुमिंद्राय ॥६॥
पीतये॥आदींहंसोयथागणंविश्वस्यावीवशन्मतिं॥अत्योनगोभिरज्यते॥उभेसो

मावचाकशन्मृगोनतक्तोऽअर्षसि ॥ सीदन्नृतस्ययोनिमा ॥ अभिगावोऽअनूषतयोषाजार
मिवप्रियं ॥ अगन्नाजिंयथाहितं ॥ अस्मेधेहिद्युमद्यशोमघवद्भ्यश्चमह्यंच ॥ सनिंमेधामुत
श्रवः ॥ २२ ॥ प्रसोमासोविपश्चितोपान्नयंत्यूर्मयः ॥ वनानिमहिषाऽइव ॥ अभिद्रोणानिब
भ्रवःशुक्राऽऋतस्यधारया ॥ वाजंगोमंतमक्षरन् ॥ सुताऽइंद्रायवायवेवरुणायमरुद्भ्यः ॥
सोमाऽअर्षंतिविष्णवे ॥ तिस्रोवाचऽउदीरतेगावोमिमंतिधेनवः ॥ हरिरेतिकनिक्रदत् ॥
अभिब्रह्मीरनूषतयह्वीऋतस्यमातरः ॥ मर्मृज्यंतेदिवःशिशुं ॥ रायःसमुद्रांश्चतुरोस्म
भ्यंसोमविश्वतः ॥ आपवस्वसहस्रिणः ॥ २३ ॥ प्रसुवानोधारयातनेंदुर्हिन्वानोऽअर्ष
ति ॥ रुजद्दृळ्हाव्योजसा ॥ सुतऽइंद्रायवायवेवरुणायमरुद्भ्यः ॥ सोमोऽअर्षतिविष्णवे ॥
वृषाणंवृषभिर्यतंसुन्वंतिसोममद्रिभिः ॥ दुहंतिशक्मनापयः ॥ भुवत्त्रितस्यमर्ज्योभु
वदिंद्रायमत्सरः ॥ संरूपैरज्यतेहरिः ॥ अभीमृतस्यविष्टपंदुहतेपृश्निमातरः ॥ चारुप्रि
यतमंहविः ॥ समेनमह्रुताऽइमागिरोऽअर्षंतिसस्रुतः ॥ धेनूर्वाश्रोऽअवीवशत् ॥ २४ ॥ आ
नःपवस्वधारयापवमानरयिंपृथुं ॥ ययाज्योतिर्विदासिनः ॥ इंदोसमुद्रमीङ्खयपवस्व
विश्वमेजय ॥ रायोधर्त्तानऽओजसा ॥ त्वयावीरेणवीरवोभिष्यामपृतन्यतः ॥ क्षराणो
ऽअभिवार्य्यं ॥ प्रवाजमिंदुरिष्यतिसिषासन्वाजसाऽऋषिः ॥ व्रताविदानऽआयुधा ॥
तंगीर्भिर्वाचमीङ्खयंपुनानंवासयामसि ॥ सोमंजनस्यगोपतिं ॥ विश्वोयस्यव्रतेजनोदा
धारधर्मणस्पतेः ॥ पुनानस्यप्रभूवसोः ॥ २५ ॥ असर्जिरथ्योयथापवित्रेचम्वोःसुतः ॥
कार्ष्मन्वाजीन्यक्रमीत् ॥ सवह्निःसोमजागृविःपवस्वदेववीरति ॥ अभिकोशंमधुश्चुतं ॥

॥प.स.॥ सनोज्योतींषिपूर्व्यंपवमानविरोचय॥क्रत्वेदक्षायनोहिनु॥शुंभमानऽऋतायुभिर्मृज्यमा।
॥७॥ नोगभस्त्योः॥पवतेवारेऽअव्यये॥सविश्वादाशुषेवसुसोमोदिव्यानिपार्थिवा॥पवतामांत
7 रिक्ष्या॥आदिवस्पृष्ठमश्वयुर्गव्ययुःसोमरोहसि॥वीरयुःशवसस्पते॥२६॥ससुतःपी।
तयेवृषासोमःपवित्रेऽअर्षति॥विघ्नन्रक्षांसिदेवयुः॥सपवित्रेविचक्षणोहरिरर्षति।
धर्णसिः॥अभियोनिंकनिक्रदत्॥सवाजीरोचनादिवःपवमानोविधावति॥रक्षोहावा
रमव्ययं॥सत्रितस्याधिसानविपवमानोऽअरोचयत्॥जामिभिःसूर्यंसह॥सवृत्रहावृ
षासुतोवरिवोविददाभ्यः॥सोमोवाजमिवासरत्॥सदेवःकविनेषितो३भिद्रोणानिधा
वति॥इंदुरिंद्रायमंहना॥२७॥एषउस्यवृषारथोऽव्योवारेभिरर्षति॥गच्छन्वाजंसहस्रिणं॥
एतंत्रितस्ययोषणोहरिंहिन्वंत्यद्रिभिः॥इंदुमिंद्रायपीतये॥एतंत्यंहरितोदशमर्मृज्यं
तेऽअपस्युवः॥याभिर्मदायशुंभते॥एषस्यमानुषीष्वाश्येनोनविक्षुसीदति॥गच्छंजा
रोनयोषितं॥एषस्यमद्योरसोवचष्टेदिवःशिशुः॥यऽइंदुर्वारमाविशत्॥एषस्यपी।
तयेसुतोहरिरर्षतिधर्णसिः॥क्रंदन्योनिमभिप्रियं॥२८॥आसुरर्षबृहन्मतेपरिप्रिये
णधाम्ना॥यत्रदेवाऽइतिब्रवन्॥परिष्कृण्वन्ननिष्कृतंजनाययातयन्निषः॥वृष्टिंदिवः
परिस्रव॥सुतऽएतिपवित्रऽआत्विषिंदधानओजसा॥विचक्षाणोविरोचयन्॥अयं
सयोदिवस्परिरघुयामापवित्रऽआ॥सिंधोरूर्मीव्यक्षरत्॥आविवासन्परावतोऽअ
थोऽअर्वावतःसुतः॥इंद्रायसिच्यतेमधु॥समीचीनाऽअनूषतहरिंहिन्वंत्यद्रिभिः॥यो ॥७॥
नावृतस्यसीदत॥२९॥पुनानोऽअक्रमीदभिविश्वामृधोविचर्षणिः॥शुभंतिविप्रंधी

त्रिभिः॥ आयोनिमरुणोरुहद्गमदिंद्रंवृषासुतः॥ ध्रुवेसदसिसीदति॥ नूनोरयिंमहामिंदोऽस्म
भ्यंसोमविश्वतः॥ आपवस्वसहस्रिणं॥ विश्वासोमपवमानद्युम्नानींदवाभर॥ विदाःसह
स्रिणीरिषः॥ सनःपुनानऽआभररयिंस्तोत्रेसुवीर्यं॥ जरितुर्वर्धयागिरः॥ पुनानऽइंदवाभ
रसोमद्विबर्हसंरयिं॥ वृषन्निंदोनउक्थ्यं॥ ३०॥ प्रयेगावोनभूर्णयस्त्वेषाऽअयासोऽअक्रमुः॥
घ्नंतःकृष्णामपत्वचं॥ सुवितस्यमनामहेतिसेतुंदुराव्यं॥ साह्वांसोदस्युमव्रतं॥ शृण्वेवृष्टे
रिवस्वनःपवमानस्यशुष्मिणः॥ चरंतिविद्युतोदिवि॥ आपवस्वमहीमिषंगोमदिंदोहिर
ण्यवत्॥ अश्वावद्वाजवत्सुतः॥ सपवस्वविचर्षणऽआमहीरोदसीपृण॥ उषाःसूर्योनर
श्मिभिः॥ परिणःशर्मयंत्याधारयासोमविश्वतः॥ सरारसेवविष्टपं॥ ३१॥ जनयन्रोच
नादिवोजनयन्नप्सुसूर्यं॥ वसानोगाऽअपोहरिः॥ एषप्रत्नेनमन्मनादेवोदेवेभ्यस्परि॥
धारयापवतेसुतः॥ वावृधानायतूर्वयेपवंतेवाजसातये॥ सोमाःसहस्रपाजसः॥ दुहा
नःप्रत्नमित्पयःपवित्रेपरिषिच्यते॥ क्रंदंदेवाँऽअजीजनत्॥ अभिविश्वानिवार्याभिदे
वाँऽऋतावृधः॥ सोमःपुनानोऽअर्षति॥ गोमन्नःसोमवीरवदश्वावद्वाजवत्सुतः॥ पव
स्वबृहतीरिषः॥ ३२॥ योऽअत्यइवमृज्यतेगोभिर्मदायहर्यतः॥ तंगोभिर्वासयामसि॥
तन्नोविश्वाऽअवस्युवोगिरःशुंभंतिपूर्वथा॥ इंदुमिंद्रायपीतये॥ पुनानोयातिहर्यतःसो
मोगीर्भिःपरिष्कृतः॥ विप्रस्यमेध्यातिथेः॥ पवमानविदारयिमस्मभ्यंसोमसुश्रियं॥
इंदोसहस्रवर्चसं॥ इंदुरत्योनवाजसृत्कनिक्रंतिपवित्रऽआ॥ यदक्षारतिदेवयुः॥ पवस्व
वाजसातयेविप्रस्यगृणतोवृधे॥ सोमरास्वसुवीर्यं॥ ३३॥ इतिपव०स०द्वितीयोध्यायः२॥

॥प॰स॰॥ हरिः ॐ ॥ प्रणइंदोमहेतनऽऊर्मिन्नबिभ्रदर्षसि ॥ अभिदेवाँऽअयास्यः ॥ मतीजुष्टोधि
॥८॥ याहितः सोमोहिन्वेपरावति ॥ विप्रस्यधारयाकविः ॥ अयंदेवेषुजागृविः सुतऽएतिपवि
४ त्रऽआ ॥ सोमोयातिविचर्षणिः ॥ सनः पवस्ववाजयुश्चक्राणश्चारुमध्वरं ॥ बर्हिष्माँ
ऽआविवासति ॥ सनोभगायवायवेविप्रवीरः सदावृधः ॥ सोमोदेवेष्वायमत् ॥ सनोऽ
अद्यवसुत्तयेक्रतुविद्गातुवित्तमः ॥ वाजंजेषिश्रवोबृहत् ॥ १ ॥ सपवस्वमदायकंनृच
क्षादेववीतये ॥ इंदविंद्रायपीतये ॥ सनोऽअर्षाभिदूत्यं१त्वमिंद्रायतोशसे ॥ देवान्सखि
भ्यऽआवरं ॥ उतत्वामरुणंवयंगोभिरंज्मोमदायकं ॥ विनोरायेदुरोवृधि ॥ अत्यूपवित्र
मक्रमीद्वाजीधुरंनयामनि ॥ इंदुर्देवेषुपत्यते ॥ समीसखायोऽअस्वरन्वनेक्रीळंतमत्य
व्यविं ॥ इंदुंनावाऽअनूषत ॥ तयापवस्वधारयायपीतोविचक्षसे ॥ इंदोस्तोत्रेसुवीर्यं
२ ॥ असृग्रंदेववीतयेत्यासः कृत्व्याऽइव ॥ क्षरंतः पर्वतावृधः ॥ परिष्कृतासऽइंदवो
योषेवपित्र्यावती ॥ वायुंसोमाऽअसृक्षत ॥ एतेसोमासऽइंदवः प्रयस्वंतश्चमूसुताः ॥
इंद्रंवर्धंतिकर्मभिः ॥ आधावतासुहस्त्यः शुक्रागृभ्णीतमंथिना ॥ गोभिःश्रीणीतमत्स
रं ॥ सपवस्वधनंजयप्रयंताराधसोमहः ॥ अस्मभ्यंसोमगातुवित् ॥ एतंमृजंतिमर्ज्यं
पवमानंदशक्षिपः ॥ इंद्रायमत्सरंमदं ॥ ३ ॥ अयासोमः सुकृत्ययामहश्चिदभ्यवर्धत ॥
मंदानऽउद्वृषायते ॥ कृतानीदस्यकर्त्वाचेतंतेदस्युतर्हणा ॥ ऋणाचधृष्णुश्चयते ॥ आ
त्सोमऽइंद्रियोरसोवज्रः सहस्रसाभुवत् ॥ उक्थंयदस्यजायते ॥ स्वयंकविर्विधर्तरि ॥८॥
विप्रायरत्नमिच्छति ॥ यदीमर्मृज्यतेधियः ॥ सिषासतूरयीणांवाजेष्वर्वतामिव ॥ भरे

षुजिरसुषीमसि ॥ ४ ॥ तंत्वा नृम्णानि बिभ्रतं सधस्थेषु महोदिवः ॥ चारुं सुकृत्ययेमहे ॥
संवृक्तधृष्णुमुक्थ्यं महामहिव्रतं मदं ॥ शतं पुरोरुरुक्षणिं ॥ अतस्त्वा रयिमभिराजानं
सुक्रतोदिवः ॥ सुपर्णोऽअव्यथिर्भरत् ॥ विश्वस्माऽइत्स्वर्दृशे साधारणं रजस्तुरं ॥ गो
पामृतस्य विर्भरत् ॥ अधा हिन्वानऽइंद्रियं ज्यायो महित्वमानशे ॥ अभिष्टिकृद्विचर्ष
णिः ॥ ५ ॥ पवस्व वृष्टिमासुनो पामूर्मिं दिवस्परि ॥ अयक्ष्मा बृहतीरिषः ॥ तयापवस्व
धारया यया गावऽइहागमन् ॥ जन्यासऽउपनोगृहं ॥ घृतं पवस्व धारया यज्ञेषु देववीत
मः ॥ अस्मभ्यं वृष्टिमापव ॥ सनऽऊर्जे व्य १ व्ययं पवित्रं धाव धारया ॥ देवासः शृणव
न्हिकं ॥ पवमानोऽअसिष्यदद्रक्षांस्यपजंघनत् ॥ प्रत्नवद्रोचयन्रुचः ॥ ६ ॥ उत्ते शुष्मा
सऽईरते सिंधोरूर्मेरिव स्वनः ॥ वाणस्य चोदया पविं ॥ प्रसवेतऽउदीरते तिस्रो वाचो
मखस्युवः ॥ यदव्यऽएषि सानवि ॥ अव्यो वारे परिप्रियं हरिं हिन्वंत्यद्रिभिः ॥ पवमा
नं मधुश्चुतं ॥ आपवस्व मदिंतम पवित्रं धारया कवे ॥ अर्कस्य योनिमासदं ॥ सपवस्व
मदिंतम गोभिरंजानोऽअक्तुभिः ॥ इंदविंद्राय पीतये ॥ ७ ॥ अध्वर्योऽअद्रिभिः सुतं ॥
सोमं पवित्रऽआसृज ॥ पुनीहींद्राय पातवे ॥ दिवः पीयूषमुत्तमं सोममिंद्राय वज्रिणे
सुनोता मधुमत्तमं ॥ तव त्यऽइंदोऽअंधसो देवा मधोर्व्यश्नते ॥ पवमानस्य मरुतः ॥ त्वं
हि सोम वर्द्धयंत्सुतो मदाय भूर्णये ॥ वृषंस्तोतारमूतये ॥ अभ्यर्ष विचक्षण पवित्रं धा
रया सुतः ॥ अभिवाजमुतश्रवः ॥ ८ ॥ परिद्युक्षः सनद्रयिर्भरद्वाजं नोऽअंधसा ॥
सुवानोऽअर्ष पवित्रऽआ ॥ तव प्रत्नेभिरध्वभिरव्यो वारे परिप्रियः ॥ सहस्रधारो यात्तना ॥

॥प॰स॰॥ चरुनैयस्तमीखयेंदोनदानमीखय॥ वधैर्वधस्त्रमीखय॥ निशुष्ममिंद्रयेषांपुरुहूतज
॥९॥ नानां॥ योऽअस्मांऽआदिदेशति॥ शतंनऽइंदऽऊतिभिः सहस्रंवाशुचीनां॥ पवस्वमंहय
१ द्रयिः॥९॥ उतेशुष्मासोऽअस्थूरक्षोभिंदंतोऽअद्रिवः॥ नुदस्वयाःपरिस्पृधः॥ अया
निजघ्निरोजसारथसंगेधनेहिते॥ स्तवाऽअबिभ्युषाहृदा॥ अस्यव्रतानिनाधृषेप
वमानस्यदूढ्या॥ रुजयस्त्वापृतन्यति॥ तंहिन्वंतिमदच्युतंहरिंनदीषुवाजिनं॥ इंदुमिं
द्रायमत्सरं॥१०॥ अस्यप्रत्नामनुद्युतंशुक्रंदुदुह्रेऽअह्रयः॥ पयःसहस्रसामृषिं॥ अ
यंसूर्यऽइवोपदृगयंसरांसिधावति॥ सप्तप्रवतऽआदिवं॥ अयंविश्वानितिष्ठतिपु
नानोभुवनोपरि॥ सोमोदेवोनसूर्यः॥ परिणोदेववीतयेवाजाँऽअर्षसिगोमतः॥ पु
नानऽइंदविंद्रयुः॥११॥ यवंयवंनोऽअंधसापुष्टंपुष्टंपरिस्रव॥ सोमविश्वाचसौ।
भगा॥ इंदोयथातवस्तवोयथातेजातमंधसः॥ निबर्हिषिप्रियेसदः॥ उतनोगोविद
श्वविस्पवस्वसोमांधसा॥ मक्षूतमेभिरहभिः॥ योजिनातिनजीयतेहंतिशत्रुमभी
त्य॥ सपवस्वसहस्रजित्॥१२॥ परिसोमऽऋतंबृहदाशुःपवित्रेऽअर्षति॥ विघ्नन्र
क्षांसिदेवयुः॥ यत्सोमोवाजमर्षतिशतंधाराऽअपस्युवः॥ इंद्रस्यसख्यमाविशन्॥
अभित्वायोषणोदशजारंनकन्याऽनूषत॥ मृज्यसेसोमसातये॥ त्वमिंद्रायविष्ठ
वेस्वादुरिंदोपरिस्रव॥ नृन्स्तोतृन्पाह्यंहसः॥१३॥ प्रतेधाराऽअसश्चतोदिवोन।
यंतिवृष्टयः॥ अच्छावाजंसहस्रिणं॥ अभिप्रियाणिकाव्याविश्वाचक्षाणोऽअर्षति॥ ॥९॥
हरिस्तुंजानऽआयुधा॥ समर्मृजानऽआयुभिरिभोराजेवसुव्रतः॥ श्येनोनवंसुषी

दति॥ सनोविश्वादिवोवसूतोपृथिव्याअधि॥ पुनानऽइंदवाभर॥ १४॥ नरत्समंदीधाव
तिधारासुतस्यांधसः॥ नरत्समंदीधावति॥ उस्त्रावेदवसूनांमर्तस्यदेव्यवसः॥ नर०॥
ध्वसत्रयोःपुरुषंत्योरासहस्त्राणिदद्महे॥ नरत्स०॥ आययोस्त्रिंशतंतनासहस्त्राणिच
दद्महे॥ नरत्स०॥ १५॥ पवस्वगोजिदश्वजिद्विश्वजित्सोमरण्यजित्॥ प्रजावद्रत्नमा
भर॥ पवस्वाद्भ्योऽअदाभ्यःपवस्वौषधीभ्यः॥ पवस्वधिषणाभ्यः॥ त्वंसोमपवमा
नोविश्वानिदुरितातर॥ कविःसीदनिबर्हिषि॥ पवमानःस्वर्विदोजायमानोभवो
महान्॥ इंदोविश्वांअभीदसि॥ १६॥ प्रगायत्रेणगायतपवमानंविचर्षणिं॥ इंदुंसह
स्त्रचक्षसं॥ तंत्वासहस्त्रचक्षसमथोसहस्त्रभर्णसं॥ अतिवारमपाविषुः॥ अतिवा
रान्पवमानोऽअसिष्यदत्कलशांऽअभिधावति॥ इंद्रस्यहार्दाविशन्॥ इंद्रस्यसोमरा
धसेशंपवस्वविचर्षणे॥ प्रजावद्रेतुआभर॥ १७॥ अयावीतीपरिस्त्रवयस्तऽइंदोम
देष्वा॥ अवाहंनवतीर्नव॥ पुरःसद्यऽइत्थाधियेदिवोदासायशंबरं॥ अधत्यंतुर्वशं
यदुं॥ परिणोऽअश्वमश्वविद्गोमदिंदोहिरण्यवत्॥ क्षरासहस्त्रिणीरिषः॥ पवमान
स्यतेवयंपवित्रमभ्युंदतः॥ सखित्वमावृणीमहे॥ यत्तेपवित्रमूर्मयोभिक्षंतिधा
रया॥ तेभिर्नःसोममृलय॥ १८॥ सनःपुनानआभररयिंवीरवतीमिषं॥ ईशानः
सोमविश्वतः॥ एतमुत्यंदशक्षिपोमृजंतिसिंधुमातरं॥ समादित्येभिरख्यत॥ समिं
द्रेणोतवायुनासुतऽएतिपवित्रऽआ॥ संसूर्यस्यरश्मिभिः॥ सनोभगायवायवेपूष्णे
पवस्वमधुमान्॥ चारुर्मित्रेवरुणेच॥ उच्चातेजातमंधसोदिविषद्भूम्याददे॥ उग्रंशर्म

॥प॰सू॰॥ महिम्नवः॥१९॥एनाविश्वान्यर्यऽआद्युम्नानिमानुषाणां॥सिषासंतोवनामहे॥
॥१०॥ सनइंद्राययज्यवेवरुणायमरुद्भ्यः॥वरिवोवित्परिस्रव॥उपोषुजातमप्तुरंगोभि
10 र्भंगंपरिष्कृतं॥इंदुंदेवाऽअयासिषुः॥तमिद्वर्द्धंतुनोगिरोवत्संसंशिश्वरीरिव॥य
ऽइंद्रस्यहृदंसनिः॥अर्षाणःसोमशंगवेधुक्षस्वपिप्युषीमिषं॥वर्द्धासमुद्रमुक
थ्यं॥२०॥पवमानोऽअजीजनद्दिवश्चित्रंनतन्यतुं॥ज्योतिर्वैश्वानरंबृहत्॥पव
मानस्यतेरसोमदोराजन्नदुच्छुनः॥विवारमव्यमर्षति॥पवमानरसस्तवदक्षो॥
विराजतिद्युमान्॥ज्योतिर्विश्वंस्वर्दृशे॥यस्तेमदोवरेण्यस्तेनापवस्वांधसा॥दे
वावीरघशंसहा॥जघ्निर्वृत्रममित्रियंसस्निर्वाजंदिवेदिवे॥गोषाऽउऽअश्वसाऽ
असि॥२१॥संमिश्लोऽअरुषोभवसूपस्थाभिर्नधेनुभिः॥सीदंछ्येनोनयोनिमा॥
सपवस्वयऽआविथेंद्रंवृत्रायहंतवे॥वव्रिवांसंमहीरपः॥सुवीरासोवयंधनाज
येमसोममीढ्वः॥पुनानोवर्द्धनोगिरः॥त्वोतासस्तवावसास्यामवन्वंतऽआमुरः॥
सोमव्रतेषुजागृहि॥अपघ्नन्पवतेमृधोऽपसोमोऽअराव्णः॥गच्छन्निंद्रस्यनिष्कृतं॥
२२॥महोनोरायऽआभरपवमानजहीमृधः॥रास्वेंदोवीरवद्यशः॥नत्वाशतंचन
ह्रुतोराधोदित्संतमामिनन्॥यत्पुनानोमखस्यसे॥पवस्वेंदोवृषासुतःकृधी
नोयशसोजने॥विश्वाऽअपद्विषोजहि॥अस्यतेसख्येवयंतवेंदोद्युम्नऽउत्तमे॥
सासह्यामपृतन्यतः॥यातेभीमान्यायुधातिग्मानिसंतिधूर्वणे॥रक्षासमस्य ॥१०॥
नोनिदः॥२३॥एतेऽअसृग्रमिंदवस्तिरःपवित्रमाशवः॥विश्वान्यभिसौभगा॥

विघ्नंतो दुरिता पुरु सुगा तोकाय वाजिनः॥ तना कृण्वंतो ऽर्वते॥ कृण्वंतो वरिवो गवे
भ्यर्षंति सुष्टुतिं॥ इडामस्मभ्यं संयतं॥ असाव्यंशुर्मदायाप्सु दक्षो गिरिष्ठाः॥ श्येनो न
योनिमासदत्॥ शुभ्रमंधो देववातमप्सु धूतो नृभिः सुतः॥ स्वदंति गावः पयोभिः॥२४॥
आदीमश्वं न हेतारो ऽशूशुभन्नमृताय॥ मध्वो रसं सधमादे॥ यास्ते धारा मधुश्चुतो ऽसृग्र
मिंद ऊतये॥ ताभिः पवित्रमासदः॥ सो ऽअर्षेंद्राय पीतये तिरो रोमाण्यव्यया॥ सीदन्यो
ना वनेष्वा॥ त्वमिंदो परि स्रव स्वादिष्ठो ऽअंगिरोभ्यः॥ वरिवोविद्घृतं पयः॥ अयं विचर्ष
णिर्हितः पवमानः स चेतति॥ हिन्वान ऽआप्यं बृहत्॥२५॥ एष वृषा वृषव्रतः पवमानो
ऽअशस्तिहा॥ करद्वसूनि दाशुषे॥ आ पवस्व सहस्रिणं रयिं गोमंतमश्विनं॥ पुरुश्चंद्रं
पुरुस्पृहं॥ एष स्य परि षिच्यते मर्मृज्यमान ऽआयुभिः॥ उरुगायः कविक्रतुः॥ सहस्रो
तिः शतामघो विमानो रजसः कविः॥ इंद्राय पवते मदः॥ गिरा जात ऽइह स्तुत ऽइंदुरिंद्रा
य धीयते॥ विर्योना वसताविव॥२६॥ पवमानः सुतो नृभिः सोमो वाजमिवासरत्॥
चमूषु शाक्मनासदं॥ तं त्रिपृष्ठे त्रिवंधुरे रथे युंजंति यातवे॥ ऋषीणां सप्त धीतिभिः॥
तं सोतारो धनस्पृतमाशुं वाजाय यातवे॥ हरिं हिनोत वाजिनं॥ आविशन्कलशं सुतो।
विश्वा ऽअर्षन्नभि श्रियः॥ शूरो न गोषु तिष्ठति॥ आ त ऽइंद्रो मदाय कं पयो दुहंत्यायवः॥
देवा देवेभ्यो मधु॥२७॥ आ नः सोम पवित्र ऽआ सृजता मधुमत्तमं॥ देवेभ्यो देवश्रुत्तमं॥
एते सोमा ऽअसृक्षत गृणानाः श्रवसे महे॥ मदिंतमस्य धारया॥ अभि गव्यानि वीतये
नृम्णा पुनानो ऽअर्षसि॥ सनद्वाजः परि स्रव॥ उत नो गोमतीरिषो विश्वा ऽअर्ष परिष्टुभः॥

॥प॰ स्॰॥ गृणानोजमदग्निना ॥ पवस्ववाचोऽअग्रियः सोमचित्राभिरूतिभिः ॥ अभिविश्वानिकाव्या ॥
॥११॥ २८ ॥ त्वंसमुद्रियाऽअपोग्रियोवाचऽईरयन् ॥ पवस्वविश्वमेजय ॥ तुभ्येमाभुवनाकवेम।
हिम्नेसोमतस्थिरे ॥ तुभ्यमर्षंतिसिंधवः ॥ प्रतेदिवोनवृष्टयोधारायंत्यसश्चतः ॥ अभि
शुक्रामुपस्तिरं ॥ इंद्रायेंदुंपुनीतनोग्रंदक्षायसाधनं ॥ ईशानंवीतिराधसं ॥ पवमानऽऋ
तः कविः सोमः पवित्रमासदत् ॥ दधत्स्तोत्रेसुवीर्यं ॥ २९ ॥ आपवस्वसहस्रिणंरयिंसोम
सुवीर्यं ॥ अस्मेश्रवांसिधारय ॥ इषमूर्जंचपिन्वसऽइंद्रायमत्सरिंतमः ॥ चमूष्वानिषी
दसि ॥ सुतऽइंद्रायविष्णवेसोमः कलशेऽअक्षरत् ॥ मधुमाँऽअस्तुवायवे ॥ एतेऽअसृ
ग्रमाशवोतिह्वरांसिबभ्रवः ॥ सोमाऽऋतस्यधारया ॥ इंद्रंवर्धंतोऽअप्तुरः कृण्वंतोवि
श्वमार्यं ॥ अपघ्नंतोऽअराव्णः ॥ ३० ॥ सुताऽअनुस्वमारजोभ्यर्षंतिबभ्रवः ॥ इंद्रंगच्छं
तऽइंदवः ॥ अयापवस्वधारयायथासूर्यमरोचयः ॥ हिन्वानोमानुषीरपः ॥ अयुक्तसू
रऽएतशंपवमानोमनावधि ॥ अंतरिक्षेणयातवे ॥ उतत्याहरितोदशसूरोऽअयुक्तया
तवे ॥ इंदुरिंद्रऽइतिब्रुवन् ॥ परीतोवायवेसुतंगिरऽइंद्रायमत्सरं ॥ अव्योवारेषुसिंचत ॥
३१ ॥ पवमानविदारयिमस्मभ्यंसोमदुष्टरं ॥ योदूणाशोवनुष्यता ॥ अभ्यर्षसहस्रिणं
रयिंगोमंतमश्विनं ॥ अभिवाजमुतश्रवः ॥ सोमोदेवोनसूर्योद्रिभिः पवतेसुतः ॥ दधा
नः कलशेरसं ॥ एतेधामान्यार्याशुक्राऽऋतस्यधारया ॥ वाजंगोमंतमक्षरन् ॥ सुताऽ
इंद्रायवज्रिणेसोमासोदध्याशिरः ॥ पवित्रमत्यक्षरन् ॥ ३२ ॥ प्रसोममधुमत्तमोराये ॥११॥
ऽअर्षपवित्रऽआ ॥ मदोयोदेववीतमः ॥ तमीमृजंत्यायवोहरिंनदीषुवाजिनं ॥ इंदुमिंद्रा

यमत्सरं॥ आपवस्वहिरण्यवदश्ववत्सोमवीरवत्॥ वाजंगोमंतमाभर॥ परिवाजेनवाज
युमव्योवारेषुसिंचत॥ इंद्रायमधुमत्तमं॥ कविंमृजंतिमर्ज्यंधीभिर्विप्राऽअवस्यवः॥
वृषाकनिक्रदर्षति॥३३॥ वृषणंधीभिरप्तुरंसोममृतस्यधारया॥ मतीविप्राःसमस्व
रन्॥ पवस्वदेवायुषगिंद्रंगछतुतेमदः॥ वायुमारोहधर्मणा॥ पवमाननितोशसेर
यिंसोमश्रवाय्यं॥ प्रियःसमुद्रमाविश॥ अपघ्नंपवसेमृधःक्रतुवित्सोममत्सरः॥ नु
दस्वादेवयुंजनं॥ पवमानाऽअसृक्षतसोमाःशुक्रासऽइंदवः॥ अभिविश्वानिकाव्या॥
३४॥ पवमानासऽआशवःशुभ्राऽअसृग्रमिंदवः॥ घ्नंतोविश्वाऽअपद्विषः॥ पवमा
नादिवस्पर्यंतरिक्षादसृक्षत॥ पृथिव्याऽअधिसानवि॥ पुनानःसोमधारयेंदोवि
श्वाऽअपस्रिधः॥ जहिरक्षांसिसुक्रतो॥ अपघ्नंत्सोमरक्षसोभ्यर्षकनिक्रदत्॥ द्युमं
तंशुष्ममुत्तमं॥ अस्मेवसूनिधारयसोमदिव्यानिपार्थिवा॥ इंदोविश्वानिवार्या॥३५॥
वृषासोमद्युमाँऽअसिवृषादेववृषव्रतः॥ वृषाधर्माणिदधिषे॥ वृष्णस्तेवृष्ण्यंशवो
वृषावनंवृषामदः॥ सत्यंवृषन्वृषेदसि॥ अश्वोनचक्रदोवृषासंगाऽइंदोसमर्व
तः॥ विनोरायेदुरोवृधि॥ असृक्षतप्रवाजिनोगव्यासोमासोऽअश्वया॥ शुक्रासोवीर
याशवः॥ शुंभमानाऽऋतायुभिर्मृज्यमानागभस्त्योः॥ पवंतेवारेऽअव्यये॥३६॥ ते
विश्वादाशुषेवसुसोमादिव्यानिपार्थिवा॥ पवंतामांतरिक्ष्या॥ पवमानस्यविश्ववित्प्र
तेसर्गाऽअसृक्षत॥ सूर्यस्येवनरश्मयः॥ केतुंकृण्वन्दिवस्परिविश्वारूपाभ्यर्षसि॥
समुद्रःसोमपिन्वसे॥ हिन्वानोवाचमिष्यसिपवमानविधर्मणि॥ अक्रांदेवोनसूर्यः॥

॥प॰स॰॥ इंदुः पविष्ट चेतनः प्रियः कवीनां मती ॥ सृजदश्वं रथीरिव ॥ ३७ ॥ दुर्मियंस्ते पवित्र ऽ आदेवा
॥१२॥ वीः पर्यक्षरत् ॥ सीदन्नृतस्य योनिमा ॥ स नो ऽ अर्ष पवित्र ऽ आमदो यो देववीतमः ॥ इंदविं
द्राय पीतये ॥ इषे पवस्व धारया मृज्यमानो मनीषिभिः ॥ इंद्रो रुचाभिगा इहि ॥ पुनानो व
12 रिवस्कृध्यूर्जं जनाय गिर्वणः ॥ हरे सृजान ऽ आशिरं ॥ पुनानो देववीतय ऽ इंद्रस्य याहि नि
ष्कृतं ॥ द्युतानो वाजिभिर्यतः ॥ ३८ ॥ प्रहिन्वानास ऽ इंदवो च्छा समुद्रमाशवः ॥ धिया जू
ता ऽ असृक्षत ॥ मर्मृजानास ऽ आयवो वृथा समुद्रमिंदवः ॥ अग्मन्नृतस्य योनिमा ॥ परि
णो याह्यस्मयुर्विश्वा वसून्योजसा ॥ पाहि नः शर्म वीरवत् ॥ मिमाति वह्निरेतशः पदं यु
जान ऽ ऋक्वभिः ॥ प्र यत्समुद्र ऽ आहितः ॥ आ यद्योनिं हिरण्ययं मा शुर्ऋतस्य सीदति ॥
जहात्यप्रचेतसः ॥ ३९ ॥ अभि वेना ऽ अनूषते यक्षन्ति प्रचेतसः ॥ मज्जन्त्यविचेतसः ॥ इंद्रा
येंदो मरुत्वते पवस्व मधुमत्तमः ॥ ऋतस्य योनिमासदं ॥ तं त्वा विप्रा वचोविदः परिष्कृ
ण्वंति वेधसः ॥ सं त्वा मृजंत्यायवः ॥ रसं ते मित्रो ऽ अर्यमा पिबंति वरुणः कवे ॥ पवमा
नस्य मरुतः ॥ त्वं सोम विपश्चितं पुनानो वाचमिष्यसि ॥ इंदो सहस्रभर्णसं ॥ ४० ॥ उ
तो सहस्रभर्णसं वाचं सोम मखस्युवं ॥ पुनान ऽ इंदवाभर ॥ पुनान ऽ इंदवेषां पुरुहूत
जनानां ॥ प्रियः समुद्रमाविश ॥ दविद्युतत्या रुचा परिष्टोभंत्या कृपा ॥ सोमाः शुक्रा
गवाशिरः ॥ हिन्वानो हेतृभिर्यत ऽ आ वाजं वाज्यक्रमीत् ॥ सीदंतो वनुषो यथा ॥ ऋ
धक्सोम स्वस्तये संजग्मानो दिवः कविः ॥ पवस्व सूर्यो दृशे ॥ ४१ ॥ इति पवमानस्
क्ते तृतीयोऽध्यायः ॥ ३ ॥ २ ॥ ४ ॥ ५ ॥ ४ ॥ २ ॥ ४ ॥ ५ ॥ ४ ॥ २ ॥ ४ ॥ ॥१२॥

॥ हरिःऽॐ ॥ हिन्वंति सूरमुस्रयः स्वसारोऽजामयस्पतिं ॥ महामिंदुं महीयुवः ॥ पवमान
रुचारुचा देवो देवेभ्यस्परि ॥ विश्वा वसून्या विश ॥ आ पवमान सुष्टुतिं वृष्टिं देवेभ्यो दुवः ॥
इषे पवस्व संयतं ॥ वृषा ह्यसि भानुना द्युमंतं त्वा हवामहे ॥ पवमान स्वाध्यः ॥ आ पवस्व सु
वीर्यं मंदमानः स्वायुध ॥ इहो ष्विंदवा गहि ॥ १ ॥ यदद्भिः परिषिच्यसे मृज्यमानो गभस्त्योः ॥
द्रुणा सधस्थमश्नुषे ॥ प्र सोमाय व्यश्ववत्पवमानाय गायत ॥ महे सहस्रचक्षसे ॥ यस्य
वर्णं मधुश्चुतं हरिं हिन्वंत्यद्रिभिः ॥ इंदुमिंद्राय पीतये ॥ तस्य ते वाजिनो वयं विश्वा धना
नि जिग्युषः ॥ सखित्वमा वृणीमहे ॥ वृषा पवस्व धारया मरुत्वते च मत्सरः ॥ विश्वा
दधानऽओजसा ॥ २ ॥ तं त्वा धर्त्तारमोण्योः३ पवमान स्वर्दृशं ॥ हिन्वे वाजेषु वाजिनं ॥ अ
या चित्तो विपानया हरिः पवस्व धारया ॥ युजं वाजेषु चोदय ॥ आ नऽइंदो महीमिषं पवस्व
विश्वदर्शतः ॥ अस्मभ्यं सोम गातुवित् ॥ आ कलशाऽअनूषतेंदो धाराभिरोजसा ॥ एंद्र
स्य पीतये विश ॥ यस्य ते मद्यं रसं तीव्रं दुहंत्यद्रिभिः ॥ स पवस्वाभिमातिहा ॥ ३ ॥ राजा मे
धाभिरीयते पवमानो मनावधि ॥ अंतरिक्षेण यातवे ॥ आ न इंदो शतग्विनं गवां पोषं स्व
श्व्यं ॥ वहा भगत्तिमूतये ॥ आ नः सोम सहो जुवो रूपं न वर्चसे भर ॥ सुष्वाणो देववीतये ॥
अर्षा सोम द्युमत्तमोऽभि द्रोणानि रोरुवत् ॥ सीदं छ्येनो न योनिमा ॥ अप्साऽइंद्राय वायवे ॥
वरुणाय मरुद्भ्यः ॥ सोमोऽअर्षति विष्णवे ॥ ४ ॥ इषं तोकाय नो दधदस्मभ्यं सोम विश्वतः ॥
आ पवस्व सहस्रिणं ॥ ये सोमासः परावति येऽअर्वावति सुन्विरे ॥ ये वादः शर्यणावति ॥
यऽआर्जीकेषु कृत्वसु ये मध्ये पस्त्यानां ॥ ये वा जनेषु पंचसु ॥ ते नो वृष्टिं दिवस्परि पवं

॥प॰स॒॰॥ नामासुवीर्यं॥सुवानादेवासइंद्रवः॥पवंतेहर्यतोहरिर्गृणानोजमदग्निना॥हिन्वानो
॥१३॥ गोरधित्वचि॥५॥प्रशुक्रासोवयोजुवोहिन्वानासोनसप्तयः॥श्रीणानाऽअप्सुमृंजत
[13] त॥तंत्वासुतेष्वाभुवोहिन्विरेदेवतातये॥सपवस्वानयारुचा॥आतेदक्षंमयोभुवंव
न्हिमद्याद्वृणीमहे॥पांतमापुरुस्पृहं॥आमंद्रमावरेण्यमाविप्रमामनीषिणं॥पां
तमा॰॥आरयिमासुचेतुनमासुक्रतोतनूष्वा॥पांतमा॰॥६॥पवस्वविश्वचर्षणेभि
विश्वानिकाव्या॥सखासखिभ्यऽईड्यः॥ताभ्यांविश्वस्यराजसियेपवमानधामनी॥
प्रतीचीसोमतस्थतुः॥परिधामानियानितेत्वंसोमासिविश्वतः॥पवमानऽऋतु
भिःकवे॥पवस्वजनयन्निषोभिविश्वानिवार्या॥सखासखिभ्यऽऊतये॥तवशुक्रा
सोऽअर्चयोदिवस्पृष्ठेवितन्वते॥पवित्रंसोमधामभिः॥७॥तवेमेसप्तसिंधवः
प्रशिषंसोमसिस्रते॥तुभ्यंधावंतिधेनवः॥प्रसोमयाहिधारयासुतऽइंद्रायमत्स
रः॥दधानोऽअक्षितिश्रवः॥समुत्वाधीभिरस्वरन्हिन्वतीःसप्तजामयः॥विप्रमा
जाविवस्वतः॥मृजंतित्वासमग्रुवोव्येजीरावधिष्वणि॥रेभोयदज्यसेवने॥पवमा
नस्यतेकवेवाजिंत्सर्गाऽअसृक्षत॥अर्वंतोनश्रवस्यवः॥८॥अच्छाकोशंमधुश्चुत
मसृग्रंवारेऽअव्यये॥अवावशंतधीतयः॥अच्छासमुद्रमिंदवोस्तंगावोनधेनवः॥
अग्मन्नृतस्ययोनिमा॥प्रणऽइंदोमहेरणऽआपोऽअर्षंतिसिंधवः॥यद्गोभिर्वा
सयिष्यसे॥अस्यतेसख्येवयमियक्षंतस्त्वोतयः॥इंदोसखित्वमुश्मसि॥आपव
स्वगविष्टयेमहेसोमनृचक्षसे॥एंद्रस्यजठरेविश॥९॥महाँऽअसिसोमज्येष्ठऽउ ॥१३॥

ज्मा लोमिंद्र ओजिष्ठः ॥ युध्वा सन्छश्वज्जिगेथ ॥ यदुग्रेभ्यश्चिद्दोजीयान्छूरेभ्यश्चिच्छू
रतरः ॥ भूरिदाभ्यश्चिन्मंहीयान् ॥ त्वं सोम सूरऽएषस्तोकस्य साता तनूनां ॥ वृणीम
हे सख्याय वृणीमहे युज्याय ॥ अग्नऽआयूंषि पवसऽआसुवोर्जमिषं च नः ॥ आरे
बाधस्व दुछुनां ॥ अग्निरृषिः पवमानः पांचजन्यः पुरोहितः ॥ तमीमहे महागयं ॥ १० ॥
अग्ने पवस्व स्वपाऽअस्मे वर्चः सुवीर्यं ॥ दधद्रयिं मयि पोषं ॥ पवमानोऽअतिस्त्रि
धोभ्यर्षति सुष्टुतिं ॥ सूरो न विश्वदर्शतः ॥ समर्मृजानऽआयुभिः प्रयस्वान्प्रयसे हि
तः ॥ इंदुरत्यो विचक्षणः ॥ पवमानऽऋतं बृहच्छुक्रं ज्योतिरजीजनत् ॥ कृष्णातमां
सि जंघनत् ॥ पवमानस्य जंघ्नतो हरेश्चंद्राऽअसृक्षत ॥ जीराऽअजिर शोचिषः ॥ ११ ॥
पवमानो रथीतमः शुभ्रेभिः शुभ्रशस्तमः ॥ हरिश्चंद्रो मरुद्गणः ॥ पवमानो व्य
श्नवद्रश्मिभिर्वाजसातमः ॥ दधत्स्तोत्रे सुवीर्यं ॥ प्रसुवानऽइंदुरक्षाः पवित्रम
त्यव्ययं ॥ पुनानऽइंदुरिंद्रमा ॥ एष सोमोऽअधि त्वचि गवां क्रीळत्यद्रिभिः ॥ इंद्रं म
दाय जोहुवत् ॥ यस्य ते द्युम्नवत्पयः पवमानाभृतं दिवः ॥ तेन नो मृळ जीवसे ॥
१२ ॥ त्वं सोमासि धारयुर्मंद्रऽओजिष्ठोऽअध्वरे ॥ पवस्व मंहयद्रयिः ॥ त्वं सुतो नृ
मादनो दधन्वान्मत्सरिंतमः ॥ इंद्राय सूरिरंधसा ॥ त्वं सुष्वाणोऽअद्रिभिरभ्यर्ष
कनिक्रदत् ॥ द्युमंतं शुष्ममुत्तमं ॥ इंदुर्हिन्वानोऽअर्षति तिरो वाराण्यव्यया ॥ हरि
र्वाजमचिक्रदत् ॥ इंदो व्यव्यमर्षसि विश्रवांसि विश्वा सौभगा ॥ विवाजान्त्सोम गोम
तः ॥ १३ ॥ आ नऽइंदो शतग्विनं रयिं गोमंतमश्विनं ॥ भरा सोम सहस्त्रिणं ॥ पवमा

॥प॰सू॰॥ नासऽइंद्रवस्तिरःपवित्रमाद्रावः ॥ इंद्रंयामेभिराद्रात ॥ ककुहःसोम्यारसऽइंदुरिंद्राय
॥१४॥ पूर्व्यः ॥ आयुःपवतऽआयवे ॥ हिन्वंतिसूरमुस्रयःपवमानंमधुश्चुतं ॥ अभिगिरासम
स्वरन् ॥ अवितानोऽअजाश्वःपूषायामनियामनि ॥ आभक्षत्कन्यासुनः ॥ १४ ॥ अयं
14 सोमःकपर्दिनेघृतंनपवतेमधु ॥ आभक्षत्क॰ ॥ अयंतऽआघृणेसुतोघृतंनपवतेशु
चि ॥ आभक्ष॰ ॥ वाचोजंतुःकवीनांपवस्वसोमधारया ॥ देवेषुरत्नधाऽअसि ॥ आकलशे
षुधावतिश्येनोवर्मविगाहते ॥ अभिद्रोणाकनिक्रदत् ॥ परिप्रसोमतेरसोसर्जिकल
शेसुतः ॥ श्येनोनतक्तोऽअर्षति ॥ १५ ॥ पवस्वसोममंदयन्निंद्रायमधुमत्तमः ॥ असृग्रं
देववीतयेवाजयंतोरथाऽइव ॥ तेसुतासोमदिंतमाःशुक्रावायुमसृक्षत ॥ ग्रावस्तुतो
ऽअभिष्टुतःपवित्रंसोमगच्छसि ॥ दधत्स्तोत्रेसुवीर्यं ॥ एषतुन्नोऽअभिष्टुतःपवित्र
मतिगाहते ॥ रक्षोहावारमव्ययं ॥ १६ ॥ यदंतियच्चदूरकेभयंविंदतिमामिह ॥ पवमा
नवितज्जहि ॥ पवमानःसोऽअद्यनःपवित्रेणविचर्षणिः ॥ यःपोतासपुनातुनः ॥
यत्तेपवित्रमर्चिष्यग्नेविततमंतरा ॥ ब्रह्मतेनपुनीहिनः ॥ यत्तेपवित्रमर्चिवदग्ने
तेनपुनीहिनः ॥ ब्रह्मसवैःपुनीहिनः ॥ उभाभ्यांदेवसवितःपवित्रेणसवेनच ॥ मां
पुनीहिविश्वतः ॥ १७ ॥ त्रिभिष्ट्वंदेवसवितर्वर्षिष्ठैःसोमधामभिः ॥ अग्नेदक्षैःपुनी
हिनः ॥ पुनंतुमांदेवजनाःपुनंतुवसवोधिया ॥ विश्वेदेवाःपुनीतमाजातवेदःपुनी
हिमा ॥ प्रप्यायस्वप्रस्यंदस्वसोमविश्वेभिरंशुभिः ॥ देवेभ्यउत्तमंहविः ॥ उपप्रियंप ॥१४॥
निप्नतंयुवानमाहुतीवृधं ॥ अगन्मबिभ्रतोनमः ॥ अलाय्यस्यपरस्युर्ननाशतमापव

स्वदेवसोम॥ आ त्वं चिद्देवद्देवसोम॥ यः पावमानीरध्येत्यृषिभिः संभृतं रसं॥ सर्वं स पू
तु २ तमश्नाति स्वदितं मातरिश्वना॥ पावमानीर्यो ऽध्येत्यृषिभिः संभृतं रसं॥ तस्मै सरस्व
ती दुहे क्षीरं सर्पिर्मधूदकं॥ १८॥ पदशिष्ट॥ ३॥ पावमानीः स्वस्त्ययनीः सुदुघा हि घृतश्चु
तः॥ ऋषिभिः संभृतो रसो ब्राह्मणेष्वमृतं हितं॥ पावमानीर्दिशंतु न इमं लोकम।
थो ऽमुं॥ कामान्त्समर्धयंतु नो देवैर्देवीः समाहिताः॥ येन देवाः पवित्रेणात्मानं पु
नते सदा॥ तेन सहस्रधारेण पावमान्यः पुनंतु मां॥ प्राजापत्यं पवित्रं शतोद्यामं हिर
ण्मयं॥ तेन ब्रह्मविदो वयं पूतं ब्रह्म पुनीमहे॥ इंद्रः सुनीती सह मा पुनातु सोमः स्वस्त्या
वरुणः समीच्या॥ यमो राजा प्रमृणाभिः पुनातु मा जातवेदा मूर्जयंत्या पुनातु॥ ऋ
दैवस्थापे षयस्तु तपसस्तेपुः सर्वे स्वर्जिगीषवः॥ तपसस्तपसोग्रं तु पावमानीरृचो ब्रवी
त्॥ १९॥ यन्मे गर्भे वसतः पापमुग्रं यज्जायमानस्य च किंचिदन्यत्॥ जातस्य च यच्चा
पि च वर्धतो मे तत्पावमानीभिरहं पुनामि॥ मातापित्रोर्यन्न कृतं वचो मे यत्स्थावरं
जंगममाबभूव॥ विश्वस्य तत्प्रहृषितं वचो मे तत्पावमानीभिरहं पुनामि॥ बालघ्ना
न्मातृपितृवधाद्भूमितस्करात्सर्ववर्णगमनमैथुनसंगमात्॥ गुरोर्दाराभिगमना
च्चैव पावमानीभिरहं पुनामि॥ ब्रह्मवधात्सुरापानात्स्वर्णस्तेयाद्वृषलिगमनमैथु
नसंगमात्॥ पापेभ्यश्च प्रतिग्रहात्सद्यः प्रहरंति सर्वं दुष्कृतं तत्पावमानीभिरहं
पुनामि॥ क्रयविक्रयाद्योनिदोषाद्भक्ष्याद्भोज्यात्प्रतिग्रहात्॥ असंभोजनाच्चापि नृ
शंसं तत्पावमानीभिरहं पुनामि॥ २०॥ दुर्यष्टं दुरधीतं पापं यच्चाज्ञानतो कृतं॥ अ

॥प॰सू॰॥ याभ्रिताभ्यासंयोज्यास्तत्पावमानीभिरहंपुनामि॥ अमंत्रमन्नंयत्किंचिद्दूयतेचहुताशने॥
॥१५॥ संवत्सरकृतंपापंतत्पावमानीभिरहंपुनामि॥ ऋतस्ययोनयोमृतस्यधामविश्वादेवेभ्यः
15 पुण्यगंधाः॥ तान्नऽआपःप्रवहंतुपापंशुद्धागच्छामिसुकृतांसुलोकं तत्पावमानीभि
रहंपुनामि॥ पावमानीःस्वस्त्ययनीर्याभिर्गच्छतिनांदनं॥ पुण्यांश्चभक्षान्भक्षयत्य।
मृतत्वंचगच्छति॥ पावमानीःपितृन्देवान्ध्यायेभ्यश्चसरस्वती॥ ऋषींस्तस्योपपव।
तैतस्मीरंसर्पिर्मधूदकं॥ पावमानंपरंब्रह्मशुक्रंज्योतिःसनातनं॥ पितृंस्तस्योप।
तिष्ठतत्॰॥ पावमानंपरंब्रह्मयेपठंतिमनीषिणः॥ सप्तजन्मभवेद्विप्रोधनाढ्योवेद
पारगः॥ दशोत्तराण्यृचांश्चैवपावमानीःशतानिषट्॥ एतज्जपन्नुजपेन्मंत्रंघोर
मृत्युभयंहरेत्॥२१॥ ऋचोऽअक्षरेपरमेव्योमन्यस्मिन्देवाऽअधिविश्वेनिषेदुः॥
यस्तन्नवेदकिमृचाकरिष्यतियऽइत्तद्विदुस्तऽइमेसमासते॥ ॐ॥ इतिश्रीषष्टाष्ट
केपवमानसूक्तचतुर्थोध्यायः॥ ४॥ शुभंभवतु॥ ॐ॥ श्रीकृष्णार्पणमस्तु॥ छ॥
संवत्॥१८॥९२॥ दक्षिणायनेवर्षाऋतुभाद्रपदमासेकृष्णपक्षेत्रयोदश्यांमंदवास
रेतद्दिनेमध्यान्हसमयेसमाप्तः॥ क्षेत्रपुरमंडलमध्येउमापतिसमीपे॥ देवकाल।
टेलिखितंजवाहिरगिरगोसाईं॥ पु[illegible]कंपठनार्थं॥ श्रीराम॥ जयराम॥ जयजयराम॥
यदक्षरपदभ्रष्टंमात्राहीनंचयद्भवेत्॥ तत्सर्वंक्षम्यतांदेवप्रसीदपरमेश्वर॥१॥ छ॥